


समापनमहे मान्याः कुलाधिपतयः अतिथयः कुलपतयश्चेत्यादयः




संस्कृतसप्ताहे शास्त्रिमहोदयानां व्याख्यानम्

# राष्ट्रियशिक्षानीतिः – 2020
## द्विदिवसीया अन्तर्जालीया राष्ट्रियसङ्गोष्ठी

**दिनङ्कः - ०४-०५.०९.२०२०**

तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागेन राष्ट्रियशिक्षानीतिः 20 इति विषयमधिकृत्य सेप्टेम्बरमासस्य 4, 5 दिनाङ्कयोः द्विदिवसीया अन्तर्जालीया राष्ट्रियसङ्गोष्ठी समायोजिता। सङ्गोष्ठ्यामस्यां राष्ट्रस्य विभन्नराज्येभ्यः विभिन्नविश्वविद्यालयानाम् आचार्याः, सहाचार्याः, सहायकाचार्याः, संस्कृतशिक्षकाः, शोधच्छात्राश्च पत्रवाचनमकुर्वन्।

उद्घाटनसमारोहः (दि.04-09-20, प्रातः 10.30)


आचार्यः प्रह्लादजोशी


प्रो. पि. वेङ्कटरावः

सङ्गोष्ठ्याः अस्याः उद्घाटनसमारोहः 04-09-20 दिनाङ्के प्रातः 10.30 वादने विश्वविद्यालयस्य मान्यकुलपतेः आचार्यस्य वि. मुरलीधरशर्ममहोदयस्य आध्यक्ष्ये सम्पन्नः। कार्यक्रमस्यास्य मुख्यातिथिः आसीत् विश्वविद्यालयानुदानायोगस्य सहायुक्ता मान्या डा. (श्रीमती) अर्चना ठाकूरमहोदया आसीत्। अयं कार्यक्रमः कु. वसुप्रदायाः मङ्गलाचरणेन समारब्धः। तदनु शिक्षासङ्कायाध्यक्षः आचार्यः प्रह्लादजोशीमहोदयः समुपस्थितानाम् अतिथीनां स्वागतमकरोत्। ततः परं शिक्षाशास्त्रविभागाध्यक्षः प्रो. पि. वेङ्कटरावमहोदयः मुख्यातिथेः डा. (श्रीमती) अर्चना ठाकूरमहोदयायाः स्वागतं परिचयञ्चाकरोत्।



मुख्यातिथिः
डा. अर्चना ठाकूरः

## मुख्यातिथिभाषणम्

तदनु कार्यक्रमस्य मुख्यातिथिः डा. अर्चना ठाकूरमहोदया स्वकीयभाषणे राष्ट्रियशिक्षा-नीतिः 2020 इत्यस्य स्वरूपं वर्णयन्ती विश्वविद्यालयशिक्षा कौशलकेन्द्रिता, बहुविषय-केन्द्रिता च भविष्यतीति अवदत्। अस्याः उद्देश्यं वैश्विकस्तरे 2040 वर्षाभ्यन्तरे भारतं महच्छशक्तिशालिरूपेण परिवर्तनमिति, तथैव शिक्षायां समानता तथा गुणवत्तापूर्णशिक्षा इति प्रास्तौत्।

## अध्यक्षभाषणम्



अध्यक्षः
आचार्यः वि. मुरलीधरशर्मा

कार्यक्रमस्य अध्यक्षः मान्यः कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोयः स्वकीये अध्यक्षभाषणे संगोष्ठ्याः अस्याः प्रासङ्गिकतां समुपवर्ण्य अग्रिमे काले शिक्षायाः स्वरूपपरिवर्तने राष्ट्रियशिक्षानीतिः 2020 इत्यस्य आधारेण संस्कृतशिक्षा-विकासे विश्वविद्यालयस्य तथा शिक्षाविभागस्य भूमिकाञ्च प्रास्तौत्। राष्ट्रियशिक्षा-नीतेः क्रियान्वयनदृष्ट्या विश्वविद्यालयस्य कार्याणि कर्त्तव्यानि च प्रास्तौत्।

अन्ते धन्यवादार्पणं संगोष्ठ्याः सहसंयोजकः डा. ए. सच्चिदानन्दमूर्तिः अकरोत्। उद्घाटनकार्यक्रमस्य सञ्चालनं संगोष्ठ्याः संयोजकः प्रो. एस्. मुरलीधररावुमहोदयः अकरोत्।



प्रो. एस्. मुरलीधररावः



डा. ए. सच्चिदानन्दमूर्तिः

## प्रथमसत्रम्

**दि. 04-09-2020, 12.00 - 1.00**

सत्राध्यक्षः - आचार्यः रजनीकान्तशुक्लः, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. श्री देसु हरिकृष्णः, सहायकाचार्यः, अरोरा महाविद्यालयः, हैदराबाद,

2. श्री नन्द दुलाल, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, अगर्तला

3. श्री सोमित्रः भट्टाचार्यः

4. वी. प्रदीप कुमारः, शोधच्छात्रः

सञ्चालिके - डा. श्रीमती ए. सुनीता, सहायकाचार्या, शिक्षाविभागः

कु. वैष्णवी, सहायकाचार्या, शिक्षाविभागः

## द्वितीयसत्रम्

**दि. 04-09-2020, 2.00 – 3.00**

सत्राध्यक्षः - आचर्यः प्रह्लाद रा. जोशी, शिक्षासङ्कायप्रमुखः

पत्रप्रस्तोतारः - 1. डा. अरुण भट, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, शृंगेरी

2. श्री तन्मयमण्डल, शोधच्छात्रः

3. डा. वेणुगोपालरावः, केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर

सञ्चालकः - डा. ए. शेखररेड्डी, सहायकाचार्यः, शिक्षाविभागः

## तृतीयसत्रम्

**दि. 04-09-2020, 3.10 – 4.10**

सत्राध्यक्षा - आचार्या. एन्. लता, , शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. विद्याधरः प्रभल, केन्द्रीयसंस्कृतविश्वविद्यालयः, गुरुवायूर

2. श्री आशिषकुमार पाण्डेय, शोधच्छात्रः

3. कु. स्वातीरेका साहू, शोधच्छात्रा

4. श्री शङ्कर बेरा, शोधच्छात्रः

सञ्चालकः - डा. दत्तात्रेयशर्मा, सहायकाचार्यः, शिक्षाविभागः

## चतुर्थसत्रम्

**दि. 04-09-2020, 4.20 – 5.20**

सत्राध्यक्षः - डा. के. के. शैन्, सहाचार्यः, अध्यक्षः, NCTE-दक्षिणक्षेत्रीयसमितिः

पत्रप्रस्तोतारः - 1. डा. एम्. आदेन्न नायक्, सहायकाचार्यः, शिक्षाविभागः

2. कु. श्रुति के. बी. शोधच्छात्रा

3. श्री विष्णुभट्ल रामलिंगेश्वर शर्मा, शोधच्छात्रः

4. श्री एस्. वी. विजयकुमारः, शोधच्छात्रः

सञ्चालकौ - डा. सो. ल. सीताराम शर्मा, सहायकाचार्यः, शिक्षाविभागः

डा. वैजर्सु बालसुब्रह्मण्यम्, सहायकाचार्यः, शिक्षाविभागः

## पञ्चमसत्रम्

दि. 04-09-2020, 5.30 - 6.30

सत्राध्यक्षः - आचार्यः पी. वेंकटरावः, शिक्षाशास्त्रभागाध्यक्षः

पत्रप्रस्तोतारः - 1. डा. जि. उमानरसिंहमूर्तिः, सहायकाचार्यः, शिक्षाविभागः

2. डा. श्रीकरः, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, शृंगेरी

3. डा. एस् टी पी कनकवल्ली, PDF

4. श्री सिद्धार्थ शङ्कर मण्डल, शोधच्छात्रः

सञ्चालकौ - डा. जि. उमानरसिंहमूर्तिः, सहायकाचार्यः, शिक्षाविभागः

डा. एम्. आदेन्न नायक्, सहायकाचार्यः, शिक्षाविभागः

## षष्ठसत्रम्

**दि. 05-09-2020, 10.00 - 11.00**

सत्राध्यक्षा - आचार्या के. कादम्बिनी, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. एन्. वी, श्रीनिवासरावः, सहायकाचार्यः, तिरुपतिः

2. डा. कुमारः बागेवाडीमठ, सहायकाचार्यः, शिक्षाविभागः

3. डा. विजयकुमारदासः, शोधच्छात्रः

4. श्री मिलन् माजी, शोधच्छात्रः

5. कु. दीपान्विता दास, शोधच्छात्रः

सञ्चालकः - डा. कुमारः बागेवाडीमठ, सहायकाचार्यः, शिक्षाविभागः

## सप्तमसत्रम्

**दि. 05-09-2020, 11.10 - 12.10**

सत्राध्यक्षः - आचार्यः एस्. दक्षिणामूर्तिशर्मा, शिक्षाविभागः,

निदेशकः, अन्नमाचार्यपरियोजना, सम्पादकः(प्र), सप्तगिरिमासपत्रिका च

पत्रप्रस्तोतारः - 1. श्री कृष्णानन्दः दनाना, केन्द्रीयसंस्कृतविश्वविद्यालयः, हिमाचलप्रदेशः

2. डा. जयन्तः नुनिया, सहायकाचार्यः, शिक्षाविभागः

3. कु. सलवादि वसुधा, शोधच्छात्रा

4. श्री हरेकृष्णदासः, शोधच्छात्रः

5. श्री अरुणेन्द्रठाकूरः, शोधच्छात्रः

6. श्री कपिलवायि रैवतशर्मा, शोधच्छात्रः

सञ्चालकौ - डा. पी माधवरावः, सहायकाचार्यः, शिक्षाविभागः

डा. जयन्तः नुनिया, सहायकाचार्यः, शिक्षाविभागः

**अष्टमसत्रम्**

**दि. 05-09-2020, 12.20 - 1.20**

सत्राध्यक्षः - आचार्यः राधागोविन्दत्रिपाठी, शिक्षाविभागः,

पत्रप्रस्तोतारः - 1. कु. एस्. वैष्णवी, सहायकाचार्यः, शिक्षाविभागः

2. डा. आशिष खान, सहायकाचार्यः, कलकत्ता

3. डा. एस्. कृष्णा, केन्द्रीयसंस्कृतविश्वविद्यालयः, मुम्बई

4. कु. यदुश्री के. पी., शोधच्छात्रा

5. श्री अवस्थिशैलेशकुमारः, शोधच्छात्रः

6. डा. पी. सुभाषचन्द्रबोसः, शोधच्छात्रः

7. डा. ए. चारुकेशः, सहायकाचार्यः, शिक्षाविभागः

सञ्चालकः - डा. ए. चारुकेशः, सहायकाचार्यः, शिक्षाविभागः

**नवमसत्रम्**

**दि. 05-09-2020, 2.00 - 3.00**

सत्राध्यक्षः - डा. बी. पी. एम्. श्रीनिवासः, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, पुरी

पत्रप्रस्तोतारः - 1. डा. आलोकमण्डल, सहायकाचार्यः, शिक्षाविभागः

2. डा. मण्डल चन्द्रशेखरगौड, सहाचार्यः, तेलंगाणा

3. डा. कोम्पेल्ल शिवकुमारः, संस्कृताध्यापकः, तेलंगाणा

4. श्री कोदण्डपाणिः, शोधच्छात्रः

5. श्री विश्वजित् प्रामाणिक्, शोधच्छात्रः

6. श्री विमलेश झा, शोधच्छात्रः

सञ्चालकः - डा. आलोकमण्डल, सहायकाचार्यः, शिक्षाविभागः

## दशमसत्रम्

**दि. 05-09-2020, 3.10 - 4.10**

सत्राध्यक्षः - डा. आर्. चन्द्रशेखरः, सहाचार्यः, शिक्षाविभागः

पत्रप्रस्तोतारः - 1. डा. लक्ष्मणकुमारः, सहायकाचार्यः, शिक्षाविभागः

2. कु. अर्चकं श्रीविद्या, शोधच्छात्रः

3. कु उमा मन्ना, शोधच्छात्रा

4. श्री चन्दनपाल, शोधच्छात्रा

सञ्चालकः - डा. लक्ष्मणकुमारः, सहायकाचार्यः, शिक्षाविभागः

### समापनसमारोहः (दि. 05-09-2020, सायम् 5.00 वादने)

सङ्गोष्ठ्याः समापनसमारोहः 05-09-20 दिनाङ्के सायं 5.00 वादने विश्वविद्यालयस्य मान्यकुलपतेः आचार्य. वि. मुरलीधरशर्ममहोदयस्य आध्यक्ष्ये सम्पन्नः। कार्यक्रमस्यास्य मुख्यातिथिः आसीत् देहलीस्थस्य संस्कृत_ संवर्धनप्रतिष्ठानस्य निदेशकः डा.चान्दकिरणसलूजामहोदयः आसीत् । अयं कार्यक्रमः कु. महत्याः मङ्गला_ चरणेन समारब्धः । तदनु शिक्षासङ्कायाध्यक्षः आचार्यः प्रह्लाद रा. जोशीमहोदयः समुपस्थितानाम् अतिथीनां स्वागतमकरोत् । ततः परं सङ्गोष्ठ्याः संयोजकः आचार्यः एस्. मुरलीधररावः सङ्गोष्ठ्याः प्रतिवेदनं प्रास्तौत् ।

### मुख्यातिथिभाषणम्

कार्यक्रमस्य मुख्यातिथिः डा.चान्दकिरणसलूजामहोदयः स्वकीयभाषणे राष्ट्रियशिक्षानीति2020 द्वारा संस्कृतशिक्षायै कल्पितान् अवसरान् प्रास्तौत् । तथैव विश्वविद्यालयस्तरे राष्ट्रियशिक्षानीति2020 द्वारा छात्राणां कृते प्रकल्पितानां विभिन्नव्यवस्थानां विषये च प्रास्तौत् ।



डा.चान्दकिरणसलूजा

### अध्यक्षभाषणम्



आचार्यः वि. मुरलीधरशर्मा

कार्यक्रमस्य अध्यक्षः मान्यः कुलपतिः आचार्यः वि. मुरलीधरशर्ममहोदयः राष्ट्रिय-शिक्षानीतिः 2020 द्वारा भारतीयशिक्षायां नैकविधविकासकार्याणि भविष्यन्ति, आधुनिकधारायाम् अधीयानाः छात्राः संस्कृतविषयान् पठितुं, तथैव संस्कृतच्छात्राणां कृते आधुनिकविषयान् पठितुं च अवसरः अनया नीत्या प्रकल्पितः इत्यवोचत् । अन्ते धन्यवादार्पणं डा. सो.ल.सीतारामशर्मा अकरोत् । समापनसमारोहस्य सञ्चालनं संगोष्ठ्याः सहसंयोजकः डा. ए. सच्चिदानन्दमूर्तिः अकरोत् ।

डा. ए. सच्चिदानन्दमूर्तिः





डा. सो.ल.सीतारामशर्मा

# संगोष्ठ्याः चित्राणि


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः 2020
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
दि. 4, 5 सेप्टेम्बर 2020


विषयाः
- 27-08-2020
- 02-09-2020
https://forms.gle/K18WC9ZMnbkpQ3UW7


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः २०२०
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
उद्घाटनसमारोहः


राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपति
शिक्षाशास्त्रविभागः
राष्ट्रियशिक्षानीतिः २०२०
द्विदिवसीया राष्ट्रिया अन्तर्जालीयसङ्गोष्ठी
समापनसमारोहः
zoom













## राष्ट्रियशिक्षानीतिः - छात्रैस्सह एकः परिसंवादः

**दिनाङ्कः - ०८.०९.२०२०**

राष्ट्रियसंस्कृतविश्वविद्यालयेन ०८.०९.२०२० दिनाङ्के **राष्ट्रियशिक्षानीतिः-२०२० - शैक्षिकपरिवर्तने विद्यार्थिनां भूमिका** इति विषये विश्वविद्यालयच्छात्रैः सह परिसंवादकार्यक्रम आयोज्यत । तत्र पद्मश्रीपुरस्कृता: **श्रीचमूकृष्णशास्त्रिमहोदयाः** छात्रैः सह प्रकृतविषये परिसंवादं कृतवन्तः । विश्वविद्यालयस्य शोधच्छात्राः विविधशास्त्रेष्वधीयाना आचार्यच्छात्राश्च सहभागं स्व्यकार्षुः ।



# राष्ट्रियशिक्षानीतेः (२०२०) विशेषसन्दर्भे संस्कृतशिक्षणम्
## (दिनद्वयव्यापिनी अन्तर्जालीया राष्ट्रियसंगोष्ठी)

## Sanskrit Teaching - With special Refference to National Education Policy - 2020
### ( A Two Day National E-symposium)

**दिनाङ्कः - १२-१३.१०.२०२०**


### उद्घाटनसमारोहः

राष्ट्रियसंस्कृतविश्वविद्यालयस्य शिक्षाशास्त्रविभागेन १२-१३.१०.२०२० दिनाङ्कयोः राष्ट्रियशिक्षानीतेः (२०२०) विशेषसन्दर्भे संस्कृतशिक्षणम् इति विषयमधिकृत्य दिनद्वयव्यापिनी अन्तर्जालीया राष्ट्रियसंगोष्ठी समायोज्यत । दिनद्वयात्मकसंगोष्ठ्याः समुद्घाटनसमारोहे विश्वविद्यालयेन मुख्यातिथित्वेन समाहूताः भारतसर्वकारस्य मान्याः शिक्षामन्त्रिणः **श्रीमन्तः डा. रमेशपोखरियालनिशङ्कमहोदयाः** संगोष्ठीं समुदजीघटन् । अस्मद्विश्वविद्यालयस्य मान्याः कुलपतयः **आचार्याः वि. मुरलीधरशर्ममहोदयाः** कार्यक्रमस्य आध्यक्ष्यं निरवाक्षुः । अस्मिन् सन्दर्भे ई-पुस्तकद्वयं मान्यानां मन्त्रिणां करकमलाभ्यां प्राकाश्यत । -

1) Sanskrit Teachig - with Special Refference National Education Policy-2020.

2) New Trends in Education Psychology.



**उद्घाटनकार्यक्रमे मुख्यातिथिभाषणं कुर्वन्तः मान्याः शिक्षामन्त्रिणः**